# Lakshmisaubhagyavratavidhinirupanam 1

# લક્ષ્મીસૌભાગ્યવ્રતવિધિનિરૂપણમ્ ૧

## Document Information

Text title : Lakshmisaubhagyavratavidhinirupanam 1

File name : lakShmIsaubhAgyavratavidhinirUpaNam1.itx

Category : devii, devI, lakShmInArAyaNIyasaMhitA, lakShmI

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 3 | adhyAya 136/74-114||

Latest update : April 12, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 12, 2026

*sanskritdocuments.org*

# લક્ષ્મીસૌભાગ્યવ્રતવિધિનિરૂપણમ્ ૧

વસન્તમાસમાસાદ્ય તૃતીયાયાં તુ શુક્લકે ।
પૂર્વાહ્ણે યજમાનસ્તુ તિલૈઃ સ્નાનં સમાચરેત્ ॥ ૭૪॥

સૌભાગ્યા લલિતા દેવી વવ્રે નારાયણં તદા ।
તયા સહૈવ માં નારાયણં સમ્પૂજયેત્ પ્રગે ॥ ૭૫॥

તૃતીયાયાં ફલૈઃ પુષ્પૈર્ધૂપૈર્દીપૈર્નિવેદનૈઃ ।
પઞ્ચગવ્યેન ચ તીર્થતોયૈઃ સંસ્નાપયેચ્છ્રિયમ્ ॥ ૭૬॥

નમો લક્ષ્મ્યૈ મહાલક્ષ્મ્યૈ લલિતાયૈ તુ મસ્તકે ।
નમો દેવ્યૈ મહાદેવ્યૈ લલિતાયૈ મુખે નમઃ ॥ ૭૭॥

નમો બ્રાહ્મ્યૈ મહાબ્રાહ્મ્યૈ વૈષ્ણવ્યૈ હૃદયે નમઃ ।
નમો માત્રે મહામાત્રે નારાયણ્યૈ તથોદરે ॥ ૭૮॥

નમઃ શ્રિયૈ મહાશ્રિયૈ વાસુદેવ્યૈ કટિસ્થલે ।
નમો ભાગ્યૈ મહાભાગ્યૈ સૌભાગ્યાયૈ ઉરૌ નમઃ ॥ ૭૯॥

નમો ભૂમ્યૈ મહાશૂન્યૈ વ્યાપિકાયૈ ચ પાદયોઃ ।
નમોઽનાદિકૃષ્ણનારાયણપત્ન્યૈ સમન્તતઃ ॥ ૮૦॥

સૌભાગ્યભવનાયૈ તે નમઃ કાન્તાવિભૂતયે ।
નમો યુગલરૂપાયૈ દમ્પત્યૈ તે નમો નમઃ ॥ ૮૧॥

સર્વસૌભાગ્યયુક્તાયૈ લલિતાયૈ નમો નમઃ ।
એવં સંસ્નાપ્ય વિધિના વસ્ત્રાલઙ્કારમર્પયેત્ ॥ ૮૨॥

ભૂષણાનિ સમસ્તાનિ શ◌ૃઙ્ગારાણિ સમર્પયેત્ ।
ઘૃતં સિન્દૂરકં ક્ષીરં કુઙ્કુમં લવણં તથા ॥ ૮૩॥

જીરકં કજ્જલં ચાપિ ચન્દનં રક્તચન્દનમ્ ।
હરિદ્રાં કર્પૂરકં ચ કસ્તૂરીં કઙ્કણાનિ ચ ॥ ૮૪॥

શઙ્ખલાં નત્થિકાં તન્તીં નૂપુરોર્મિકસંયુતામ્ ।
નિષ્પાવાન્ પત્રિકાં પૂગીફલં તામ્બૂલકં તથા ॥ ૮૫॥

શર્કરાં ચ લવઙ્ગં ચ એલાં સંસ્થાપયેત્ પુરઃ ।
ધૂપં દીપં ચ નૈવેદ્યં દદ્યાજ્જલં સુગન્ધિ ચ ॥ ૮૬॥

આરાર્ત્રિકં પ્રકુર્યાદ્વૈ લલિતાયાઃ પ્રદક્ષિણમ્ ।
નમસ્કારં પુનઃ કુર્યાત્ પુષ્પાઞ્જલિં સમર્પયેત્ ॥ ૮૭॥

પ્રાર્થયેલ્લલિતાં કૃષ્ણં દીયેતાં ભાગ્યમુત્તમમ્ ।
દમ્પતીરૂપમેવાપિ હ્યખણ્ડિતસુખાવહમ્ ॥ ૮૮॥

રસધાન્યાદિભોજ્યાનિ મિષ્ટાન્નાનિ સદા ગૃહે ।
સૂપૌદનાનિ શાકાનિ દધ્યોદનાનિ યાનિ ચ ॥ ૮૯॥

ક્ષીરોદ્ભવાનિ સર્વાણિ ચેક્ષુભવાનિ યાનિ ચ ।
વેશવારાદિકં ચાપિ મુખવાસાદિકાનિ ચ ॥ ૯૦॥

શય્યાસ્તરણયાનાનિ વેષશઙ્ગારકાણિ ચ ।
ભૂષામ્બરાણિ સર્વાણિ વિવિધાભૂષણાનિ ચ ॥ ૯૧॥

યાનવાહનરથકા ગોવાજિગજસદ્વૃષાઃ ।
દાસદાસીભૃત્યસખીવર્ગાઃ સ્વર્ણાલયાસ્તથા ॥ ૯૨॥

ભવનાનિ વિચિત્રાણિ ક્ષેત્રાણિ વાટિકાસ્તથા ।
મહોદ્યાનાનિ સર્વાણિ વંશઃ પુત્રાઃ સુતાસ્તથા ॥ ૯૩॥

સ્નુષાશ્ચ બાન્ધવાશ્ચાપિ યશો કીર્તિશ્ચ સમ્પદઃ ।
ઋદ્ધિઃ શાન્તિઃ રત્નગજા આરોગ્યં ધર્મ ઉત્તમઃ ॥ ૯૪॥

ભક્તિર્જ્ઞાનં ચ દીયન્તાં કૃષ્ણૌ ધામાક્ષરં તતઃ ।
એવમભ્યર્ચ્ય તૌ તત્ર સ્થાપયેન્મણ્ડપે ત્વથ ॥ ૯૫॥

હવનં તુ પ્રકુર્યાદ્વૈ ચાષ્ટોત્તરશતાત્મકમ્ ।
દક્ષિણાં ચ તતો દદ્યાદ્ ભોજયેદ્વિપ્રસજ્જનાન્ ॥ ૯૬॥

દીનાડનાથાન્ ભોજયેચ્ચ દદ્યાદ્દાનાનિ વૈ તતઃ ।
પરિહારં પ્રકુર્વીત મધ્યાહ્ને પુનરેવ ચ ॥ ૯૭॥

ભોજયેદ્વિવિધં ભોજ્યં જલં તામ્બૂલકં દિશેત્ ।
સ્વાપયેદ્ઘટિકામુત્થાપયેત્ કૃષ્ણાં નરાયણમ્ ॥ ૯૮॥

જલં ફલં પ્રદદ્યાચ્ચ સાયં રાત્રૌ પ્રપૂજયેત્ ।
આરાર્ત્રિકં સોત્સવં ચ કારયેદ્ભોજયેત્તતઃ ॥ ૯૯॥

સ્વાપયેદ્ભગવન્તૌ તૌ શયને મૃદુલે શુભે ।
સહૈવ શયનં ચૈતત્ સૌભાગ્યશયનં વ્રતમ્ ॥ ૧૦૦॥

પ્રાતરુત્થાપયેદ્દેવૌ પૂજયેદ્વિધિના તતઃ ।
તથા ચ દ્વિજદામ્પત્યં પૂજયેદ્વસ્ત્રભૂષણૈઃ ॥ ૧૦૧॥

સૌભાગ્યાઽષ્ટકસંયુક્તં સુવર્ણચરણદ્વયમ્ ।
દ્વયોશ્ચતુષ્ટયં દદ્યાદ્વિપ્રાય સાધવે તદા ॥ ૧૦૨॥

લલિતાં ગુરવે દદ્યાત્ કૃષ્ણં દદ્યાત્તુ સાધવે ।
યુગલં સાધવે દદ્યાત્ સૌભાગ્યચિરતાઽઽપ્તયે ॥ ૧૦૩॥

એવં સંવત્સરં યાવત્ તૃતીયાયાં સમાચરેત્ ।
વત્સરાન્તે પ્રકુર્યાચ્ચ સૂદ્યાપનં મહત્તમમ્ ॥ ૧૦૪॥

ચૈત્રે શ‍ૃઙ્ગાટકં દદ્યાદ્વૈશાખે ઘૃતપાયસમ્ ।
જ્યેષ્ઠે મન્દારકુસુમં વૃન્દાપત્રં શુચૌ તથા ॥ ૧૦૫॥

શ્રાવણે દધિ દદ્યાચ્ચ નભસ્યે તુ કુશોદકમ્ ।
ક્ષીરમાશ્વયુજે માસિ કાર્તિકે નવનીતકમ્ ॥ ૧૦૬॥

માર્ગે માસે દ્વિદલાં ચ પૌષે ઘૃતં સશર્કરમ્ ।
માઘે કૃષ્ણાતિલાન્ દદ્યાત્ પઞ્ચગવ્યં તુ ફાલ્ગુને ॥ ૧૦૭॥

તુલસીકમલાદીનિ સર્વમાસે મતાનિ વૈ ।
એવં કૃત્વા વ્રતં નારી કુમારી વિધવાઽપિ વા ॥ ૧૦૮॥

વ્રતાન્તે શયનં દદ્યાત્ સર્વોપસ્કરસંયુતમ્ ।
લક્ષ્મીનારાયણૌ હૈમૌ શયને સ્થાપયેત્તતઃ ॥ ૧૦૯॥

દાનં દદ્યાદ્બ્રાહ્મણાય સાધવે વા સુપૂજિને ।
ધાન્યાલઙ્કારગોદાનં ધનં દદ્યાદ્દ્વિજાતયે ॥ ૧૧ ૦॥

એવં કરોતિ યઃ સમ્યક્ સૌભાગ્યશયનવ્રતમ્ ।
સર્વાન્ કામાનવાપ્નોતિ પદં ચાનન્તમશ્નુતે ॥ ૧૧૧॥

યસ્તુ દ્વાદશવર્ષાણિ સૌભાગ્યશયનવ્રતમ્ ।

કરોતિ સ્ત્રી નરો વાપિ દેવ્યનુગ્રહલાલિતૌ ॥ ૧૧૨॥

પૂજ્યમાનૌ વસેતાં સ્વઃ યાવત્કલ્પાડયુતત્રયમ્ ।
શ‍ૃણુયાદ્વા પઠેદ્વાપિ પ્રદદ્યાદથ વા મતિમ્ ॥ ૧૧૩॥

સોઽપિ દેવેશ્વરો ભૂત્વા સ્વર્ગે વસેન્ન સંશયઃ ।
ભુક્તિં મુક્તિમવાપ્નોતિ શાશ્વતાનન્દસમ્પદઃ ॥ ૧૧૪॥

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતાયાઃ દ્વાપરયુગસન્તાનાત્મકસ્ય
તૃતીયખણ્ડે ૧૩૭-અધ્યાયાન્તર્ગતં

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૩। અધ્યાય ૧૩૬/૭૪-૧૧૪॥

lakShmInArAyaNIyasaMhitA . khaNDa 3. adhyAya 136/74-114..

Proofread by PSA Easwaran

---

*Lakshmisaubhagyavratavidhinirupanam 1*
pdf was typeset on April 12, 2026

Please send corrections to *sanskrit@cheerful.com*